# ।। राहुस्तोत्रम् ।।

राहुर्दानवमत्री च सिंहिकाचित्तनन्दनः ।
अर्धकायः सदाक्रोधी चन्द्रादित्यविमर्दनः ।।१।।
रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः ।
ग्रहराजः सुधापायी राकातिथ्यमिलाषुकः ।।२।।
कालदृष्टिः कालरूपः श्रीकण्ठहृदयाश्रयः ।
विधुंतुदः सैंहिकेयो घोररूपो महाबलः ।।३।।
ग्रहपीडाकरो दंद्री रक्तनेत्रो महोदरः ।
पञ्चविंशतिनामानि स्मृत्वा राहुं सदा नरः ।।४।।
यः पठेन्महती पीडा तस्य नश्यति केवलम् ।
आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ।।५।।
ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम् ।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ।।६।।

इति श्रीस्कंदपुराणे राहुस्तोत्रं संपूर्णम् ।।